**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा नवम्बर/दिसम्बर् – २०१६**

| | | |
|---|---|---|
| कक्षा- आचार्यः – १ (Sem – 1) | **प्रश्नपत्रम् – ५** | गुणाः – ७० |
| विषयः – वेदः (ऐच्छिकः) | **कोड – C.E – 4.1.1** | समयः- ३:०० तः ६:०० |
| दिनाङ्कः – ०९-१२-२०१६ | सन्दर्भग्रन्थः – वैदिकसूक्तसङ्ग्रहः | |

---

प्रथमान्वितिः (युनिट– १)

**प्रश्नः १** **द्वयोरेकः प्रश्नः समाधेयः ।** **(१२)**

(अ) नासदीयसूक्तस्याधारेण सृष्टिप्रक्रियां विवृणुत

(आ) आधुनिकयुगे पितृसूक्तस्य आवश्यकता विद्यते न वा विवेचयत

**प्रश्नः २** **द्वयोः एकस्य व्याख्या विधेया ।** **(४)**

(क) अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः । देवो देवेभिरागमत् ॥

(ख) उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु

**प्रश्नः ३** **चत्वार एव प्रश्नाः समाधेयाः ।** **(४)**

(क) नासदीयसूक्तस्य छन्दः किमस्ति?

(ख) पितृपुरुषाणां कृते आहुतिप्रदानसमये किमुच्चार्यते?

(ग) कः देवानां 'होता' इत्यत्र होता पदेन कः सम्बोध्यते ?

(घ) "शर्म" इति शब्दस्य कोऽर्थः?

(ङ) "दोषावस्तः" इति शब्दस्य कोऽर्थः?

(च) पितरः कति विधाः ? के च ते ?

द्वितीयान्वितिः (युनिट– २)

**प्रश्नः ४** **एकस्या व्याख्या कार्या ।** **(८)**

(अ) आधुनिकसमाजं प्रति अक्षसूक्तस्य महत्त्वं प्रतिपादयत।

(आ) पर्जन्यसूक्तस्य लोकोपकारितां दर्शयत

**प्रश्नः ५** **द्वयोः एकस्य व्याख्या विधीयताम् ।** **(४)**

क) जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति॥

ख) अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥

**प्रश्नः ६** **त्रयः एव प्रश्नाः समाधेयाः ।** **(३)**

(क) द्युतनिन्दा कस्मिन् सूक्तेवर्तते ?

(ख)वाक्सूक्तस्य का देवता ?

(ग) "अनागा" इति शब्दस्य कोऽर्थः ?

(घ) अक्षसूक्तस्य अपरं नाम किम्?

(ङ) अक्षैर्मादीव्यः –इत्यस्य कोऽर्थः ?

तृतीयान्वितिः (युनिट – ३)

**प्रश्नः ७ द्वयोः किमपि एकम् उत्तरयत ।** **(१२)**

(अ)ईशोपनिषदि प्रतिपादितम् आत्मतत्वं विवृणुत

(आ)शिवसंकल्पसूक्तस्याधारेण मनसः आध्यात्मिकस्वरूपं विवेचयत ।

**प्रश्नः ८ कस्यापि एकस्य व्याख्या विधेया ।** **(४)**

(क) तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः।
तद्ग्रावाणः सोमसुतो मयो भुवस्तदश्विना श्रृणुतं धिष्ण्या युवम्

(ख) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥

**प्रश्नः ९ केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि लेख्यानि** । **(४)**

(क) कः शोभनमार्गेण अस्मान् नयति ?

(ख) "क्रतुः" इति शब्दस्य कोऽर्थः ?

(ग) शिवसंकल्पसूक्ते कस्य स्थिरिकरणोपायाः प्रदर्शिताः ?

(घ) शिवसंकल्पसूक्तस्य का देवता?

(ङ) "अस्नाविरः" इत्यस्य कोऽर्थः?

(च) आत्मनःस्वरूपं किम्?

चतुर्थी अन्वितिः (युनिट – ४)

**प्रश्नः १० द्वयोः एकः प्रश्नः समाधेयः ।** **(८)**

(क) कर्मकाण्डदृष्ट्या आध्यात्मिकदृष्ट्या चशुक्लयजुर्वेदीयपुरुषसूक्तस्य महत्वं वैशिष्ट्यंच प्रतिपादयत ।

(ख) ' शं नो मित्रः शं वरुणः'- इति शान्तिपरकमन्त्रस्य व्याख्यां कुरुत ।

**प्रश्नः ११ द्वयोः एकस्य व्याख्या कार्या** **(४)**

(क) त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहा भवत्पुनः।
ततो विष्वङ् व्यक्रा मत्साशनानशने अभि ॥

(ख) नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव॥

**प्रश्नः १२ त्रयाणाम् अर्थं लिखत** **(३)**

(क) प्रब्रवाम । (ख) शम् । (ग) वाजसातौ ।

(घ) उरुक्रमः । (ङ) सप्त समिधः।

*********